# अष्टादशः पाठः
# होलिकोत्सवः

छत्तीसगढप्रदेशस्य प्रियः उत्सवः होलिकोत्सवः अस्ति। जनाः उत्सवं श्रुत्वैव आनन्दम् अनुभवन्ति। छत्तीसगढप्रदेशस्य जनानाम् इमम् उत्सवं प्रति अतिनिष्ठा लक्ष्यते। अस्माकं प्रदेशे अनेके उत्सवाः समायोज्यन्ते। परं होलिकोत्सवस्य वैशिष्ट्यम् अनुपमेयमस्ति।

होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां सम्पद्यते। अस्योत्सवस्य आगमनं समशीतोष्णऋतुकाले भवति। वसन्तागमनेन सर्वासु दिशासु शस्यानि आच्छादितानि भवन्ति। उद्यानेषु नवपुष्पाणि विकसन्ति। मयूराः नृत्यन्ति, पिकाः गायन्ति च। अस्मिन्–समये सर्वेषां प्राणीनां हृदि प्रफुल्लता सञ्चरति।

छत्तीसगढम् कृषिप्राधान्यप्रदेशः अस्ति। अधिकाधिकजनानां जीवनं कृषौ एव अवलम्बितम्। कृषकाः षण्मासपर्यन्तं कृषिकार्यं बहुयत्नेन कुर्वन्ति। पश्चात् धनधान्यं सम्प्राप्य हर्षमनुभवन्ति।

प्राचीनकाले सर्वे गृहस्थाः यज्ञं विदधति स्म। ते यज्ञसम्पादनार्थं यथेष्टं समिधानि नवान्नानि घृतानि दुग्धानि तथा अन्यानि द्रव्याणि च प्रयच्छन्ति स्म। अद्यापि सैव प्रथा भिन्नतया दृश्यते। यज्ञस्य प्राचीनरुपं विलुप्तमस्ति। अधुना बालकाः इतस्ततः काष्ठानि एकत्रीकुर्वन्ति–दहन्ति च। अस्मिन्नवसरे जनाः बहुरङ्गरञ्जितजलं परस्परं क्षिपन्ति खेलन्ति च विविधैः रागैः। आबालवृद्धाः प्रसन्नाः परस्परं मिलन्ति। सर्वे गायन्ति नृत्यन्ति च। सर्वे स्नेहेन अन्येषां मुखेषु गुलालं मर्दयन्ति।



फागगानमाध्यमेन जनाः स्वसुखानि प्रदर्शयन्ति। यथा ते आनन्दार्णवे निमग्नाः इति प्रतीयते। गृहेषु बहूनि मिष्ठान्नानि निर्मितानि भवन्ति। एका कथा प्रचलिता – होलिका प्रह्लादस्य "पितृस्वसा" आसीत्। सा प्रह्लादेन सह अग्नौ प्रविष्टा। विष्णोः प्रसादेन प्रह्लादः न दग्धः। होलिकैव दग्धा। अस्यां कथायां असत्योपरि सत्यस्य विजयः भवतीति संदेशः।

उत्सवोऽयम् स्वस्थं पर्यावरणं सृजति। परस्परं सौहार्द्रभावम् संवर्धयति च। एवं आनन्दस्य उल्लासस्य च अयमुत्सवः सर्वेषां मनांसि रञ्जयतीति।

## शब्दार्थाः

श्रुत्वैव = (श्रुत्वा+एव) सुनकर। अनुभवन्ति = अनुभव करते हैं। इमम् उत्सवं प्रति = इस उत्सव के लिए। समायोज्यन्ते = आयोजित करते हैं। अनुपमेयम् = जिसकी उपमा (तुलना) न हो। प्रफुल्लता = प्रसन्नता। अवलम्बितम् = आश्रित। हर्षमनुभवन्ति = हर्ष (आनन्द) का अनुभव करते हैं। यज्ञं विदधति स्म = यज्ञ करते थे। प्रयच्छन्ति स्म = याचना करते थे। इतस्ततः = इधर – उधर। काष्ठानि = लकड़ियों को। एकत्रीकुर्वन्ति = एकत्र करते हैं। आबालवृद्धाः = बच्चे वृद्ध सभी। क्षिपन्ति = फेंकते हैं। (प्र.पु. या अ.पु.बहुव.) आनन्दार्णवे = आनन्द के सागर में। (सप्तमी एक वचन) पितृस्वसा = फूफी (पिता की बहन)। प्रसादेन = कृपा से (तृतीया विभक्ति एक वचन)। सौहार्द्रभावम् = मित्रभाव। संवर्धयति = बढ़ाता है। सृजति = निर्माण करता है। रञ्जयति = प्रसन्न होता है (प्र.पु. या अन्य पु.एक वचन)।

## अभ्यासप्रश्नाः

**प्रश्न 1. संस्कृत में उत्तर दीजिए –**

Q718H7

(क) कस्मिन् मासे होलिकोत्सवः भवति ?

(ख) वसन्तागमनेन सर्वासु दिशासु कानि आच्छादितानि भवन्ति ?

(ग) प्रह्लादस्य पितृस्वस्रुः किं नाम अस्ति ?

(घ) होलिकोत्सवः किं सदेशं प्रेषयति ?

**प्रश्न 2. रिक्त स्थान की पूर्ति कीजिए –**

(क) होलिकोत्सवः ...................... मासे ................ तिथौ भवति।

(ख) मयूराः .................................. पिकाः .............................. च।

(ग) ................................ प्रसादेन .............................. न दग्धः।

(घ) असत्योपरि ...................................................... विजयः भवति।

**प्रश्न 3. "पितृस्वसा" शब्द के रुप सभी विभक्तियों में लिखिए ।**